© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# सीताहरणनाटके मुख्यरस: करुण:



**डा.सुनीलकुमार शर्मा**
सहायकाचार्य:(स.अ.)शिक्षाशास्त्रविभाग:,
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.),
क.जे सोमैया संस्कृतविद्यापीठम्, मुम्बई

**शोधालेखसार:–** करुणरसस्य आविर्भाव: इष्टवस्तुन: नाशात् अथवा अनिष्टद्रव्यस्य प्राप्तिकारणा् भवति । सर्वेऽपि विषया: प्रायश: सीताहरणनाटके वर्ण्यन्ते । अत: करुणरसदृष्ट्या रामायणस्य यथा वैशिष्ट्यं वर्तते, तथैव सीताहरणनाटकस्यापि वैशिष्ट्यमस्तीति निश्चप्रचं वक्तुं शक्यते ।

**मुख्य शब्द–** वर्ण:, देवता ,यम:, स्थायिभाव:, शोक:, आलम्बन:, उद्दीपनम्, अनुभावा:, निर्वेद|

---

सीताहरणनाटके मुख्यरस: 'करुण" एव भवति । सीताहरणमिति नामकरणादेव पत्न्या: अपहरणनादनन्तरं स्वामिन: रामस्य दुर्दशा व्यज्यते । नाट्यकार: रावमहोदय: नाटकेऽस्मिन् बहुधा रामस्य, सीताया:, लक्ष्मणस्य, भरतस्य च वियोगव्यथाम् अवर्णयत् ।

**इष्टनाशादनिष्टाप्ते: करुणाख्यो रसो भवेत् ।**
**धीरै: कपोतवर्णोऽयं कथितो यमदैवत: ।।**
**शोकोऽत्र स्थायिभाव: स्याच्छोच्यमालम्बनं मतम् ।**
**तस्य दाहादिकावस्था भवेदुद्दीपनं पुन: ।।**
**अनुभावा: दैवनिन्दा भूपातक्रन्दितादय: ।**
**वैवर्ण्योच्छवासिनि:श्वास-स्तम्भ-प्रलपनानि च ।।**
**निर्वेदमोहापस्मारव्याधिग्लानि-स्मृति-श्रमा: ।**
**विषादजडतोन्मादचिन्ताद्या: व्याभिचारिण: ।।१**

करुणरसस्य आविर्भाव: इष्टवस्तुन: नाशात् अथवा अनिष्टद्रव्यस्य प्राप्तिकारणा् भवति । अस्य वर्ण: कपोतवर्ण:, देवता यम:, स्थायिभाव: शोक:, आलम्बन: विनष्टव्यक्ति:, उद्दीपनम् दाहादिकावस्था, दैवनिन्दन-भूमिपतन- क्रन्दन- वैवर्ण्य-उच्छवास-नि:श्वास-स्तम्भ-प्रलपनादय: अस्य अनुभावा:, निर्वेद-मोहापस्मार-व्याधि-ग्लानि-स्मृति-श्रम-विषाद-जडता-उन्माद-चिन्तादय: अस्य व्यभिचारिभावाश्च सन्ति ।

सीताहरणनाटके सीतापहरणादनन्तरं रामलक्ष्मणयो: करुणवेदना सहृदयैरास्वाद्यते । तत्र द्वितीयाङ्के राम: आश्रमे सीतां न प्राप्य उन्मादीव इतस्तत: तामन्विष्य वदति – 'सीते ! लक्ष्मण ! शून्य इदानीमाश्रम: । भक्षिता सीता राक्षसै: । सीते ! न लभे प्रतिवचनम् । आं ज्ञातम् । सीते ! क्वापि निलीनासि । अलं दारुणेनानेन परिहासेन । असकृदुक्तासि मैवं परिहसितुम् । नितरामुद्विग्नोऽस्मि । अयि कठिने ! प्रार्थये, दर्शयात्मानं झटिति । लक्ष्मण ! नैतावन्मामुपेक्षते सीता । नूनमत्र सा नास्ति । गोदावरीं गच्छ । तत्र पश्य । अथवा त्वमत्र तिष्ठ । अहमेव गत्वा ज्ञास्यामि । न पश्यामि सीतां गोदावरीप्राप्न्ते । सीते क्वासि ? अपि जीवसि ? त्वामपश्यन् उन्मत्तो भवामि । सीते ! सीते ! देहि मे प्रतिवचनम् ।" (इति विलपति राम:)

अत्र इष्टवस्तुन: सीताया: वियोगाजन्यशोक: एव करुणरसत्वेन परिणमति । सीता अत्र आलम्बनविभाव:, सीताया: अपहरणमुद्दीपनम्, रामस्य प्रलपनम्, वैवर्ण्यम्, क्रन्दनमित्यादय: अनुभावा: ; पुनश्च रामस्य उन्माद:, विषाद:, ग्लानि: इत्येते व्यभिचारिभावा: भवन्ति । एतेषां संयोगात् शोकस्थायिभाव: करुणरस: द्योत्यते ।

पुनरपि विजयमुखेन नाट्यकार: श्रीरामचन्द्रस्य करुणचित्रमुपस्थापयति। यथा -

**उन्मादीव तरोस्तरुं द्रवति तत्पश्चाद्दरीदृश्यते**

**आरुह्य द्रुमशेखरास्तदटवीदेशान् मुहुर्वीक्षते।**

**नैवं क्वापि विलोक्यते जनकजेत्यार्त्या निषीदत्यधो**

**भ्रतुर्हस्तमथावलम्ब्य विवृतोद्वेगं शनै: रोदिति ।।२**

अत्र रामस्य उन्माद:, तरोस्तरुं प्रति गत्वा सीताया: अन्वेषणम्, सीतां क्वापि न सम्प्राप्य अध: निषीदनम्,उद्वेग:, रोदनमित्येतत्सर्वं सहृदयहृदये शोकमेव जनयति। तस्मात् करुणरस एवात्रास्वाद्यते।

एवमेव आरम्भादेव सीताया: विरहव्यथातुर: राम: सर्वं क्लेशं षोढ्वा कालयं यापयति। तत्र तृतीयाङ्के द्वितीयदृश्ये वर्षर्तो: प्राकृतिकशोभावं वर्णयन् रामचन्द्र: सीताया: स्मरणं कृत्वा विलपति। तेनोच्यते – '..... अयमशनिनिपातो येन सर्वं जगद् विदीर्यत इव। वत कथमिदानीं वर्तते सीता कुत्र वा। मां चिन्तयन्ती कथं वा विलपति सीता। मन्येऽयं वृष्टिपातो मम सीतायाश्च परस्परविलापा-श्रुपात एव। आ मध्याह्नं प्रसक्ता अधुना वृष्टि: शान्ता। गगनमनावृतं भानुश्च पुन: प्रकाशते। इत्यादि।"३

पुन: शरदागमनेन व्यथातुर: राम: कथयति – 'अयि लक्ष्मण पश्य शरद्रात्रे: शोभाम्। मेघनिर्मुक्तं गगनं प्रसन्नाश्च दिश:। शरज्ज्योत्स्नया सर्वं जगदाप्लावितमिव दृश्यते। अहो ! सौन्दर्यपरीवाह उडुपते रोदसी आपूरयति। देव्या: शरद्विभावर्या ग्रैवेयकमणय इव विराजन्ते तारा:। नूनमस्यां वेलायां सीताऽपि चन्द्रबिम्बं पश्यन्ती मां चिन्तयन्ती नितान्तं खेदमनुभवति। भो: शशिन् ! अपि पश्यसि मम प्रियाम् ? कुत्रास्ति सा ? अपि कुशलिनी ! किं मे प्रतिवचनं ददासि ? भर्याभिस्ताराभि: परिवृतस्त्वमस्यां रजन्यां सुखमश्शुषे न च मां गणयसि। "४ इत्यादि।

अत्र शोक एव आस्वादाङ्कुररूपेण करुणरसत्वमाप्नोति। एवमेव सीताहरणनाटकस्य द्वितीयाङ्के वालिन: वधादनन्तरं ताराया: विलापोऽपि करुणरसमेव जनयति। तत्र तारा प्रविश्य वदति - 'हा नाथ ! (इति रुदती पादयो: पतति) हा आर्यपुत्र ! कुत्र गतोऽसि ? देहि मे प्रतिवचनम्। जात अङ्गद:! वञ्चितो आर्या रामरूपधारिणा विधिहतकेन। हा आर्यपुत्र ! महार्हशयनोचितस्त्वमुपलाकीर्णायां भूमौ कथं शेषे ?"५ इति।

वालिन: शरीरान्निष्काशितं शरं धृत्वा पुन: सा तारा स्वयमपि मृत्युं वरयितुं रामाय कथयति –

**'भो राम ! अनेनैव शरेण मामपि जहि। प्रापय मां मम भर्तु: सकाशम्।**

**व्याधोऽपि जन्तुमिथुनाद् हत्वैकं निर्घृणो भवेत्।**

**ततो मामपि हत्वा त्वं भव राम दयायुत:।।**

**जीविताद् विरक्तास्मि। जहि मां शीघ्रम्।"६ इति।**

तारा पते: मरणादनन्तरं जीवितुं नेच्छति। इत्येतत्सर्वं करुणमेव जनयति।

सम्पूर्णं रामायणमपि शोकाकुलं करुणरसप्रधानमेव भवति। आनन्दवर्धनाचार्य: ध्वन्यालोके लिखति –

**काव्यस्यात्मा स एवार्थस्तथा चादिकवे: पुरा।**

**क्रौञ्चद्वन्द्ववियोगोत्थ: श्लोक: शोकत्वमागत: ।।७**

रामायणस्यारम्भ: क्रौञ्चद्वन्द्ववियोगजनितशोकादारब्ध:, सीताया: पातालगमनेन च तस्य समाप्तिर्जाता। अर्थात् करुणादेव रामायणस्यारम्भोऽभूत्, करुणे एव रामायणं समाप्तम्। अत: तत्र मुख्यरस: करुण एवेति विदुषामभिप्राय:। पण्डितरघुनाथप्रसादचतुर्वेदमहोदया: आदिकविश्रीवाल्मीकि-शतके रामायणस्य मुख्यरसप्रसङ्गे एवं भणन्ति -

**आनन्दवर्धनाख्योऽयं ध्वनिकाव्यस्य पण्डित:।**

**मुख्यं रसं च वाल्मीके: करुणं स न्ववेदयत्।।**

**तेनैव चास्य प्रारम्भ: समाप्तिस्तेन चाभवत्।**

**करुणस्य प्रधानत्वमुक्तं रामायने तत:।।**

**आरम्भस्चास्य काव्यस्य क्रौञ्चीवेदनया यथा।**

**अन्तर्धानञ्च सीताया: करुणोत्पादकं तथा।।८**

रामायणस्य करुणरसप्राधान्यं स्वीकृत्य भवभूति:,कालिदास: इत्येते प्रमुखा: कवयोऽपि बहुधा प्रभाविता आसन् । तस्मिन् प्रसङ्गे आदिकविश्रीवाल्मीकिशतके उच्यते चतुर्वेदमहोदयेन -

**भवभूतिस्तथा चान्य: कालिदासो महाकवि: ।**
**रामायणस्य वैशिष्ट्यादधिकं सुप्रभावितौ ।।**
**उत्तरे रामचरिते करुणो भवभूतिना ।**
**निबद्ध: श्रेष्ठतां यातो गौणाश्चान्ये रसा: कृता: ।।**
**तथैव स्वीयकाव्येषु ये बद्धा: कविना रसा: ।**
**यद्यपि श्रेष्ठतां याता गौणा एव तथैव ते ।।**
**करुण: स्वेषु काव्येषु तथैव श्रैष्ठ्यमागत: ।**
**निबद्ध: कालिदासेन यथैव भवभूतिना ।।**
**इन्दुमत्यै नृपाजस्य विलाप: करुणो महान् ।**
**पाठकान् स्वीयकाव्यस्य करोति करुणाप्लुतान् ।।**
**रतेर्विलाप: कामार्थं निबद्ध: कविना तथा ।**
**अतितप्तमयो यस्या विलापे मार्दवं व्रजेत् ।।**
**करुणे भवभूतेस्तु पाषाणोऽपि विरोदिति ।**
**स्वान्तं दलति वज्रास्य वर्णित: कविना तथा ।।**
**प्राधान्यं करुणस्यात्र स्वीकृतं भवभूतिना ।**
**निमित्तभेदतश्चान्यान् रसान् भिन्नान् वदन्ति ते ।।**
**रस: कोऽपि भवेत्काव्ये सफलश्चेन्निबन्धक: ।**
**तं निबन्धयितुं तत्र श्रेष्ठत्वेन भवेत् क्षम: ।।९**

एवं प्रकारेण रामायणस्य मुख्यो रस: करुण एवेति सिद्ध्यति । एतदतिरिच्य रामायणे वीराणां गर्जनम्, जयघोष: दुन्दुभीनां निनादनमित्यादयो विषया: वर्ण्यते । ये खलु वीररसद्योतका: भवन्ति । तत्रोच्यते रघुनाथप्रसादेन -

**प्रधानत्वेन काव्येषु रसो वीरो निबद्ध्यते ।**
**प्रायश: कविभिर्नित्यं तथान्येषु च गौणता ।।**
**वीराणां गर्जनं यत्र सैनिकानाञ्च तर्जनम् ।**
**सहैव युद्धघोषेण दुन्दुभीनां निनादनम् ।।**
**जयघोषश्च वीराणां स्वान्तमुत्साहयेद् यदा ।**
**ज्ञेय: सुश्रेष्ठरूपेण रसो वीरोऽत्र वर्णित: ।।१०**

रामायणस्य प्रथमकाण्डे द्वितीयसर्गे वाल्मीकिमहर्षि: गङ्गाया: समीपे तमसानद्यां स्नातुमगच्छत् । तत्र कश्चन पापनिश्चय: वैरनिलय: व्याध: क्रौञ्चमिथुनादेकं जघान । तं शोणितपरीताङ्गं चेष्टमानं महीतले निहतं पतितं दृष्ट्वा क्रौञ्चस्य भार्या क्रौञ्ची करुणया गिरा रुराव । व्याधेन व्यापादितं तं क्रौञ्चपक्षिणं दृष्ट्वा मुने: हृदयं द्रवितं जातम् । तया करुणानुभूत्या व्याधस्य अधर्मकृत्या च विलपन्तीं क्रौञ्चीं दृष्ट्वा मुने: मुखादपि करुणपूर्णा वाणी नि:सृता । यथा –

**मा निषाद प्रतिष्ठां त्वमगत: शाश्वती: समा: ।**
**यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम् ।।११**

एवं रामायणरचनाया: अयमारम्भ: करुणरसादेवाभूत् । तत: दशरथस्य शोक:, कौशल्याशोक:, भरतशोक:, सुमित्रादीनां शोक:, रामस्य वनगमनम्, दशरथस्य वियोग:, सीताया: हरणम्, पुन: लङ्काविजयादनन्तरं सीताया: अग्निपरीक्षा, सीताया: राज्यान्निर्वासनम्, सीताया:

पातालगमनम् इत्यादय: नैके विषया: करुणापूर्णा एव भवन्ति। एतेषां पठनेन अवश्यमेव सहृदयहृदयं विगलितं स्यात्। अरण्यकाण्डे यदा रावण: सीतामपहृत्यानयत्तदा कुटीरे सीतां न सम्प्राप्य रामस्य य: विलाप: अतीवमार्मिकतया वाल्मीकिना चित्रित: अरण्यकाण्डे। केचन श्लोका: अत्र प्रस्तूयन्ते।

**यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम्।**
**शोकरक्तेक्षण: शोकादुन्मत्त इव लक्ष्यते।।**
**वृक्षाद् वृक्षं प्रधावन् स गिरेश्चाद्रिं नदान्नदीम्।**
**बभूव विलपन् राम: शोकपङ्कार्णवाप्लुत:।।**
**अपि कश्चित्त्वया दृष्टा सा कदम्बप्रिया प्रिया।**
**कदम्ब यदि जानीषे शंस सीतां शुभाननाम्।।**
**स्निग्धपल्लवसङ्काशा पीतकौशेयवासिनी।**
**शंसस्व यदि वा दृष्टा बिल्व बिल्वोपमस्तनी।।१२**

एवं व्याकुलमानस: राम: अर्जुनवृक्षम्, अशोकवृक्षम्, मृगांश्च उन्मत्त इव सीताया: सङ्केतं पृच्छति। इतस्तत: धावति। पुन: उन्मत्त इव वदति –

**तिष्ठ तिष्ठ वरारोहे न तेऽस्ति करुणा मयि।**
**नात्यर्थं हास्यशीलाऽसि किमर्थं मामुपेक्षसे।।**
**हा लक्ष्मण ! महाबाहो पश्यसि त्वं प्रियां क्वचित्।**
**हा प्रिये क्व गता भद्रे हा सीतेति पुन: पुन:।।१३**

इत्येवं विलपन् राम: वनाद्वनं परिधावन् क्वचिद् उद्भ्रमते क्वचिच्च विभ्रमते। सीतां कुत्रापि न सम्प्राप्य शोककारणात् चेतनाशून्य: भूमावपि पतति।

एते सर्वेऽपि विषया: प्रायश: सीताहरणनाटके वर्ण्यन्ते। अत: करुणरसदृष्ट्या रामायणस्य यथा वैशिष्ट्यं वर्तते, तथैव सीताहरणनाटकस्यापि वैशिष्ट्यमस्तीति निश्चप्रचं वक्तुं शक्यते।

**टिप्पणी (सन्दर्भ)**


१) सा.द. - ३/२२२-२२५
२) सी.ह. - २/२
३) तत्रैव - ३/पृ.४७-४८
४) तत्रैव - ३/पृ.४८-४९
५) तत्रैव - २/पृ.४२-४३
६) तत्रैव - २/पृ.४३
७) ध्वन्यालोके
८) आ.क.श्री.वा.श. - ९३-९५
९) आ.क.श्री.वा.श. - ९६-१०५
१०) तत्रैव - १०६-१०८
११) रा.बा.का. - २/९
१२) रा.अ.का.-३५/५-८
१३) तत्रैव - ३५/१३-१४